International Journal of Sanskrit Research 2024; 10(3): 94-98

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 94-98
© 2024 IJSR
www.anantaajournal.com
Received: 08-03-2024
Accepted: 11-04-2024

**Soumen Dutta**
Research Scholar,
Department of Sanskrit,
S.K.B. University, Purulia,
West Bengal, India

# डिण्डिमजीवदेवाचार्यविरचितं भक्तिबैभवनाटकानुसारं भक्तिमार्गम्

**Soumen Dutta**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i3b.2375

**सारांश**

भक्तिमार्गे यः जनः ईश्वरं भजति सः व्यक्तिः भक्तः नाम अभिधीयते। भक्तिदर्शनं भक्तिमार्गः इति उच्यते। पुराकाले पन्डिताः आहुः मानवजीवनस्य मूलं लक्षं भवति – धर्मः, अर्थः, कामः, मोक्षः इति चतुरवर्गः प्राप्तिः। श्रीमद्भागवते नवधाभक्तेः पुंखानुपुंखविवरणमुदाहरणञ्च दृश्यते। तथैव नारदभक्तिसुत्रे अपि भक्तेः स्वरुपस्य विषयो वर्णितः। इश्वरे परमप्रेमारुपा एव भक्तिः सा च अमृतारुपा अस्ति। अर्थात् यथा वृक्षस्य पूर्णत्वं गौरवं च फले प्राप्तं भवति तथैव भक्तेः स्वरुपं गौरवं च भगवति परमप्रेमलक्षणे एव अस्ति। शाण्डिल्येन अपि स्वभक्तिसुत्रे परमतत्त्वं प्रति परानुरक्तिरेव भक्तिः इति उक्तम्। तथैवाध्यात्मरामायणे अपि अगस्त्येन-भक्तिरुपामृतं विना स्वप्ने अपि मोक्षः न भवेत् इति कथितम्। नारदपञ्चरात्रे अपि देह-मनो-बुद्ध्यहंकारैः रहित ज्ञानयोगावरणात् मुक्तः शुद्धभावेन सर्वैरिन्द्रियैः इन्द्रियाधिपतेः श्रीहृषीकेशस्य पदानुशीलनं तदेव भक्तिरिति उच्यते। भगवद्गीतायां भगवता कृष्णेन सर्वेषु भूतेषु समः ब्रह्मभुतः भाव एव भक्तिरिति कथित।

डिण्डिमजीवदेवाचार्यः अन्यतमः भक्तिकविः अस्ति। तस्य उड़ीसाप्रदेशे जन्मः अभवत्। तस्य परिवारस्य गोत्रः वत्सः इति। तस्य जन्मतिथिविषये को अपि सूचना उपलब्धा नास्ति। डिण्डिमजीवदेवाचार्यः स्वस्य विरचित-ग्रन्थेषु 'भक्तिमार्गः' इति विषये सुन्दरं सरलं च चर्चां कृतवान् अस्ति। ईश्वरं प्राप्तुं बहवः उपायाः सन्ति। एतेषु मार्गेषु भक्तिमार्गः उत्तमः इति मन्यते। अनेन भक्तिमार्गेण जनाः सहजतया मुक्तिं प्राप्तुं शक्नुवन्ति। अतः पण्डिताः उच्यन्ते- यतः एतेषु सर्वेषु मार्गेषु उत्तमः 'भक्तिमार्गः' इति। अस्माकं शरीरमिदं नश्वरम्, एकदा विनश्यति, किन्तु शरीरान्तरात्मा न नश्यति, आत्मा अविनाशी, अविद्यामूलं अयं शरीरः। अतः अस्य शरीरस्य अज्ञानं दूरीकरणाय 'विष्णुभक्तिः' एव एकान्तं प्रयोजनम् अस्ति। अतः अस्य विष्णुभक्तिमार्गेण मानवस्य सहजतया मुक्तिं भविष्यति। अनेन भक्तिमार्गेण प्रत्येकं जनः मायावद्धजगतात् सहजतया मुक्तः भवेत्।

**कुटशब्दः** भक्तिः, ईश्वरः, भक्तिबैभवनाटकम्, विष्णुभक्तिः, समाजः, मानवजीवनः, मोक्षः, माया, भक्तिमार्गः

## प्रस्तावना

'भक्तिः' इत्यस्य मूल-कथा ईश्वरं प्रति अशेषः अनुरागः। भक्तिः इति शव्दस्य अर्थः सर्वदा ईश्वरस्य स्मरणम्। सनातनधर्मे मूलतः सर्वस्थाने ईश्वरस्य पूजा-अर्चना दृश्यते। संस्कृत 'भज्'-धातोः भक्तिशव्दस्य निष्पन्नः भवति। हिन्दुधर्मे भक्तिः आराधना तथा उपासनायाः एक-विशेषः रीतिः इति मन्यते। पूजितदेवे व्यक्तिं प्रति वा विशेषः स्नेहः प्रेमः वा भक्तिः इति कथ्यते। ईश्वरसमर्पणं पूर्णतया भक्तिः इति पन्डिताः उच्यन्ते।

**Corresponding Author:**
**Soumen Dutta**
Research Scholar,
Department of Sanskrit,
S.K.B. University, Purulia,
West Bengal, India

किन्तु यः जनः भक्तेः विनितप्रणयेन च ईश्वरं समीपम् आत्मोतसर्गः करोति, तत् 'भक्तिमार्गः' इति कथ्यते। भक्तिमार्गे यः जनः ईश्वरं भजति सः व्यक्तिः भक्तः नाम अभिधीयते। भक्तिदर्शनं भक्तिमार्गः इति उच्यते। पुराकाले पन्डिताः आहुः मानवजीवनस्य मूलं लक्षं भवति – धर्मः, अर्थः, कामः, मोक्षः इति चतुरवर्गः प्राप्तिः। समाजे मानवजीवनस्य मोक्षलाभाय बहवः उपायाः मार्गाः च लक्षन्ते। तेषु मार्गेषु भक्तिमार्गः उत्तम-मार्गः इति पन्डितजनाः मनसि चिन्तयन्ति। अनेन भक्तिमार्गेण कः अपि जनस्य सहजेन भक्तिना मोक्षलाभः करोति।

संस्कृतसाहित्ये बहवः कवयः सन्ति, तेषां विरचितानि पुस्तकानि बहुनि अपि सन्ति। विषयानुसारं संस्कृतसाहित्यं विविधभागेषु विभक्तम् अस्ति। एतेषु भागेषु अन्यतमं 'भक्तिकाव्यम्'। संस्कृतसाहित्ये बहवः भक्तिकवयः सन्ति, तथा तेषां विरचित-ग्रन्थाः अपि लक्षन्ते। एतेषु डिण्डिमजीवदेवाचार्यः अन्यतमः भक्तिकविः अस्ति। तस्य उड़ीसाप्रदेशे जन्मः अभवत्। तस्य परिवारस्य गोत्रः वत्सः इति। तस्य जन्मतिथिविषये को अपि सूचना उपलब्धा नास्ति। तस्य विरचितपुस्तकानां अध्ययनं कृत्वा तस्य कालविषये तथ्यः लभ्यते, तस्य समयकालः 1475-1533 ख्रिस्टाव्दः इति मन्यते। स चत्वारि पुस्तकानि रचितवान्। तस्य विरचित-ग्रन्थाः-

1. भक्तिवैभवनाटकम्।
2. भक्तिवैजयन्तीस्तोत्रम्।
3. भक्तिभागवतमहाकाव्यम्।
4. उत्साहभातिरुपकम्।

डिण्डिमजीवदेवाचार्यः स्वस्य विरचित-ग्रन्थेषु 'भक्तिमार्गः' इति विषये सुन्दरं सरलं च चर्चां कृतवान् अस्ति। पन्डिताः कथ्यन्ते यत् मोहमायापूर्णः अयं संसारः। जनाः एतत् जगत् सत्यम् इति मन्यन्ते। फलतः ते अस्मिन् संसारे दुखं प्राप्नुवन्ति। यथा समाजे अधिकांशजनाः विविधकार्येषु आवद्धाः सन्ति, अतः ईस्वरं प्रति तेषां मनः स्थिरं न भवति। ते ईश्वरस्य पूजां न कुर्वन्ति। फलतः तेषां ईश्वरविषये विश्वासः नष्टः भवति। मनवजीवनस्य मुख्यं उद्दश्यं ईश्वरस्य प्राप्तिः एव भवति। विभिन्नेषु कालेषु भिन्नभिन्नविद्वांसः ईस्वरप्राप्त्यर्थं भिन्नाः मार्गाः दत्तवन्तः। वर्तमानकाले जनाः विविधकार्येषु निरताः भवन्ति। फलतः ते अस्मात् संसारात् मुक्तिमार्गं न जानन्ति। भक्तिमार्गेण ईश्वरः प्राप्तुं शक्यते। ईश्वरं प्राप्तुं बहवः उपायाः सन्ति। एतेषु मार्गेषु भक्तिमार्गः उत्तमः इति मन्यते। अनेन भक्तिमार्गेण जनाः सहजतया मुक्तिं प्राप्तुं शक्नुवन्ति। अतः पण्डिताः उच्यन्ते- यतः एतेषु सर्वेषु मार्गेषु उत्तमः 'भक्तिमार्गः' इति। जनाः सहजतया एतत् मार्गं स्वीकुर्वितुं शक्नुवन्ति। ईश्वरभक्तिः पूर्णतया ईश्वरसमर्पणम्। यः जनः तस्य मनः ईश्वरं समीपे समर्पणं करोति, सः जनस्य अवश्वमेव मोक्षं भवति। डिण्डिमजीवदेवाचार्यः स्वस्य विरचित-ग्रन्थेषु भक्तिमार्गं तथा ईश्वरभक्तिः आध्यात्मिकभावना, मोक्षप्राप्तिः इति च विषयेषु सुन्दरं सरलं आलोचना कृतवान्।

## डिण्डिमजीवदेवाचार्यानुसारं भक्तिमार्ग

डिण्डिमजीवदेवाचार्यः स्वस्य विरचितग्रन्थेषु 'भक्तिमार्गः' इति विषये सुन्दरं सरलं च चर्चां कृतवान् अस्ति। पन्डिताः कथ्यन्ते यत् मोहमायापूर्णः अयं संसारः। जनाः एतत् जगत् सत्यम् इति मन्यते। फलतः ते अस्मिन् संसारे दुखं प्राप्नुवन्ति। यथा समाजे अधिकांशजनाः विविधकार्येषु आवद्धाः सन्ति, अतः ते ईस्वरं प्रति तेषां मनः स्थिरं कर्तुं न शक्यन्ते। ते ईश्वरस्य पूजां न कुर्वन्ति। फलतः तेषां ईश्वरविषये विश्वासः नष्टः भवन्ति। मनवजीवनस्य मुख्यं उद्दश्यं ईश्वरस्य प्राप्तिः एव भवति। विभिन्नेषु कालेषु भिन्नभिन्नविद्वांसः ईस्वरप्राप्त्यर्थं भिन्नाः मार्गाः दत्तवन्तः। वर्तमानकाले जनाः विविधकार्येण परिवारेण च आवद्धाः सन्ति। फलतः ते अस्मात् संसारात् मुक्तिमार्गं न जानन्ति। भक्तिमार्गेण ईश्वरः प्राप्तुं शक्यते। समाजे ईश्वरं प्राप्तुं बहवः मार्गाः सन्ति। एतेषु मार्गेषु भक्तिमार्गः उत्तमः इति मन्यते। अनेन भक्तिमार्गेण जनाः सहजतया मुक्तिं प्राप्तुं शक्नुवन्ति। अतः पण्डिताः उच्यन्ते- यतः एतेषु सर्वेषु मार्गेषु उत्तमः 'भक्तिमार्गः' इति। जनाः सहजतया एतत् मार्गं स्वीकुर्वितुं शक्नुवन्ति। ईश्वरभक्तिः पूर्णतया ईश्वरसमर्पणम्। यः जनः तस्य मनः ईश्वरं समीपे समर्पणं करोति, सः जनस्य अवश्वमेव मोक्षं लाभं भविष्यन्ति। एवं डिण्डिमजीवदेवाचार्यः स्वस्य विरचित-ग्रन्थेषु भक्तिमार्गं तथा ईश्वरभक्तिः आध्यात्मिकभावना, मोक्षप्राप्तिः इति च सुन्दरं प्रस्तुतं करोति।

डिण्डिमजीवदेवाचार्यः तस्य विरचितं 'भक्तिवैभवनाटकम्' इति ग्रन्थे प्रथमाङ्कस्य प्रारम्भे मङ्गलाचरणरुपेण भगवतः विष्णुभक्तेः कथा उल्लेखः अस्ति।

> "श्रीमल्लीलाशरीरोदयजनितसदाकुण्ठवैकुण्ठभोगो
> योगोद्योगोपभोगस्थिरहृदयदरीसुन्दरीकेशरीन्द्रः।
> हेतुः श्रेयः पदव्या भजनकृतधियां नव्यनिव्यजिभव्या-
> नव्यादव्याकृतात्मा भवभयविधुरानाश्रितानीश्वरो वः"।।
> (भक्तिबैभवनाटकम्1/1)

अत्र श्लोके विष्णुः एव स्वयम् एक एव ईश्वरः, यहः वैकुण्ठे निवसति, अस्मिन् श्लोके भगवतः विष्णोः यथार्थं महत्वं

डिण्डिमजीवदेवचार्येण वर्णितम् अस्ति। एवं प्रकारेण ग्रन्थस्य प्रारम्भे विष्णुम् आधारीकृत्य बहवः श्लोकाः डिण्डिमजीवदेवाचार्येण उपास्थापिताः सन्ति।

"विघ्नं निवारयति वर्धयते विभूतीः
स्वर्गं प्रयच्छति फलाथिभिरर्थ्यमाना।
निष्कामिनां कृतधियां तनुते विमुक्तिं
किं किं साधयति भक्तिरियं मुरारेः"।।
(भक्तिवैभवनाटकम्1/31)

अत्र विष्णोः महिमाः अस्मिन् श्लोके उक्ताः सन्ति। यदि ईश्वरं पूजयति, ईश्वरं समर्पयति, तदा तस्य सर्वे विघ्नाः अपहृताः भवन्ति, धनं वर्धते, भक्तानां प्रार्थनाः पूर्णाः भवन्ति, स्वर्गं फलरुपेण दीयते, येषां मनसि कामनावासना नास्ति तेभ्यः मोक्षः दीयते। अधुना वर्तमानसमाजे जनानां जीवने विष्णुभक्तेः वृहत् प्रयोजनम् अस्ति, तद् अत्र अस्मिन् श्लोकेण ज्ञायते। एवं सः भक्तिमार्गस्य कथा अवदत्।

"सत्यानन्दप्रकाशापरिमितवपुषो निर्विकारस्य पुंसो
या स्वल्पाकारभेदव्यसनशतदृढं बन्धमज्ञान मूलम्।
सत्त्वोद्रेकप्रकारैः शमयति सुतरां विद्यया सा स्फरन्ती
पायाद् वो विष्णुभक्तिः कलिकलुषमनोदूरदूप्रसक्तिः"।।
(भक्तिबैभवनाटकम्1/36)

अस्माकं शरीरमिदं नश्वरम्, एकदा विनश्यति, किन्तु शरीरान्तरात्मा न नश्यति, आत्मा अविनाशी, अविद्यामूलं अयं शरीरः। अतः अस्य शरीरस्य अज्ञानं दूरीकरणाय 'विष्णुभक्तिः' एव एकान्तं प्रयोजनम् अस्ति। अतः अस्य विष्णुभक्तिमार्गेण मानवस्य सहजतया मुक्तिं भविष्यति। अनेन भक्तिमार्गेण प्रत्येकं जनः मायावद्धजगतात् सहजतया मुक्तः भवेत्। एवं प्रकारेण डिण्डिमजीवदेवाचार्यः स्वग्रन्थानां माध्यमेन स्पष्टतया सरलतया च भक्तिमार्गं अस्माकं समक्षं प्रकटितवान् अस्ति।

"स्वर्गादीप्सितसाधनानि बहुशः संदर्शयन् प्रज्ञया
तवं लोकस्य सदानुरागविषयः संवर्द्धसे स्वेच्छाया।
अस्माकं यतिनां विरक्त विषयव्यपारनिष्ठात्मनां
श्रीकृष्णार्पणमेव जीवनफलं का नाम कामस्पृहा"।।
(भक्तिबैभवनाटकम्1/37)

अर्थात् त्वया स्वप्रज्ञायां बहुविधं जनान् स्वर्गमार्गं दर्शयित्वा स्वतन्त्रतया जगतः शाश्वतस्नेहविषयं वर्धितम्। किन्तु इन्द्रियतृप्तिव्यपारविरक्ताः अस्माकं तपस्विनः। अस्माकं जीवनस्य एकमेव फलं श्रीकृष्णाय आत्मसमर्पणम्। जावने कामस्य स्पृहा तथा आवश्यकता नास्ति इति। अस्य श्लोकस्य माध्यमेन डिण्डिमजीवदेवचार्यः वदति, यत् जगति अधिककांशजनाः विविध-उपायेन स्वकामनां पूर्तये मन्दमार्गं अनुसरन्ति। ते जनाः अनायासेन संसारस्य भौतिकवस्तुनाम् आकृष्टाः भवन्ति। इन्द्रियतृप्त्यर्थं विविधानि कार्याणि कुर्वन्ति सदा। परन्तु समाजे केचन् साधुजनाः सन्ति, ये इन्द्रियाणां नियन्त्रणं कर्तुं समर्थाः अभवन्। तेषां लौकिकवस्तूनाम् आसक्तिः नास्ति। तेषां जीवने मुख्यं लक्ष्यं ईश्वरं प्राप्तुं भवति। अतः ते सर्वं त्यक्त्वा ईश्वरं समर्पयन्ति। एवं भक्तिमार्गेण ईश्वरं सुलभतया प्राप्तुं शक्यते। एवं सः भक्तिमार्गस्य कथा उक्तवान्।

"अविद्यापक्षमाश्रित्य मायादेवी प्रगल्भते।
विष्णुभक्तिभगवती विद्यायां प्रीयते मुहुः"।।
(भक्तिबैभवनाटकम्1/45)

अपि च

"माया विचारयति मोहकरीमविद्यां
उल्लास्य जीवमिममात्मवशे विधास्तये।
विद्यां प्रकाश्य समये विनिधाय मुक्तिं
एनं विमोचयितुमिच्छति विष्णुभक्तिः"।।
(भक्तिबैभवनाटकम्1/47)

इदं संसारं मायया आवद्धम्। माया इदं जगतसंसारे सर्वभूतानि बध्नाति। यः जनः मायया आवद्धः भवति, स जनः बद्धः जीव इति उच्यते। अस्य मूलं कारणं अज्ञानम् तथा अविद्या। विद्या तथा ज्ञानेन जीवः अस्मात् लोकात् मुक्तिः सम्भवति। एतादृशे क्षययुगे यदा जीवस्य सर्वेषां मूल्यानां नष्टः भवति, तदा जीवस्य आत्मा-मुक्तेः एकमात्रम् उपायं हि विष्णुभक्तिः, तथा विष्णु-आराधना। एवं सः विष्णभक्तिः तथा भक्तिमार्गस्य कथा उक्तवान्।

आत्मस्वरुपमवधारितसर्वभेद
चैतन्यमात्रमपि यो न विदाङ्करोतु।
बद्धः स एव खलुतत्त्वमसीति वाक्य
बोधे भवेद्भगवतो भजनाद्विमुक्तिः।।
(भक्तिबैभवनाटकम्1/83)

अस्मिन् श्लोके मोक्षप्राप्तये यथार्थं तथ्यं डिण्डिमजीवदेवाचार्येण समकत्वेन उपस्थापितम् अस्ति। अत्र उक्तम् – यः जनः श्रद्धासहकारेण ईश्वरस्य भजनादि कर्मं करोति, स जनः अपि अनायासेन ईश्वरस्य कृपया मोक्षलाभं करोति इति। तथा तस्य ईश्वरप्राप्तिः भवति। एवं सः भक्तिमार्गस्य कथा उक्तवान्।

संस्कृतसाहित्ये 'भक्तिमार्गः' इति विषये बहवः ग्रन्थाः सन्ति। भक्तिमार्गे प्राप्तेषु ग्रन्थेषु 'श्रीगीता', महाभारतस्य 'नारायनीयोपाख्यानम्', 'शाण्डिल्यसूत्रम्', 'श्रीभागवतपुराणम्', 'नारदपञ्चरात्रम्', 'नारदसूत्रम्', 'भरद्वाजसंहिता', 'व्रह्मसंहिता' इत्यादयः प्राचीनग्रन्थाः मुख्याः सन्ति। अपि च 'चैतन्यचरितामृतम्', श्रीरामानुचार्य-विरचितं वैष्णवग्रन्थे भक्तिमार्गस्य कथा दृश्यते। एतेषु पुस्तकेषु भक्तिमार्गः इत्यस्य कथा अतीव सुन्दरं कथ्यते। भक्तिमार्गेण कथं सुलभतया मनुष्यः ईश्वरं प्राप्तुं शक्यते तथा मोक्षं लभ्यते इति वर्णितम् अस्ति।

श्रीमद्भागवते नवधाभक्तेः पुंखानुपुंखविवरणमुदाहरणञ्च दृश्यते। तथैव नारदभक्तिसुत्रे अपि भक्तेः स्वरुपस्य विषयो वर्णितः। इश्वरे परमप्रेमारुपा एव भक्तिः सा च अमृतारुपा अस्ति। अर्थात् यथा वृक्षस्य पूर्णत्वं गौरवं च फले प्राप्तं भवति तथैव भक्तेः स्वरुपं गौरवं च भगवति परमप्रेमलक्षणे एव अस्ति। शाण्डिल्येन अपि स्वभक्तिसुत्रे परमतत्त्वं प्रति परानुरक्तिरेव भक्तिः इति उक्तम्। तथैवाध्यात्मरामायणे अपि अगस्त्येन-भक्तिरुपामृतं विना स्वप्ने अपि मोक्षः न भवेत् इति कथितम्। नारदपञ्चरात्रे अपि देह-मनो-बुद्ध्यहंकारैः रहित ज्ञानयोगावरणात् मुक्तः शुद्धभावेन सर्वैरिन्द्रियैः इन्द्रियाधिपतेः श्रीहृषीकेशस्य पदानुशीलनं तदेव भक्तिरिति उच्यते। भगवद्गीतायां भगवता कृष्णेन सर्वेषु भूतेषु समः ब्रह्मभुतः भाव एव भक्तिरिति कथित।

भक्तिः वैदिकसाहित्ये मानवजीवनस्य लक्ष्यरुपेण स्वीक्रियते। वैदिकमंत्रेषु अपि भक्तिधारायाः संकेतः प्राप्तुं शक्यते। श्रवण-कीर्त्तन-स्मरण-पादसेवनार्चन-वन्दन-दास्य सख्यात्मनिवेदनादि रुपेन भक्तेः नवधा वर्णनमुपलभ्यते। तत्र परमात्मनः श्रीविष्णोः यशःकथायाः पुनः पुनः श्रवणाय ऋग्वेदस्य मंत्रे प्रमाणं प्राप्यते। यथा- सेदु श्रवोभिर्युज्यं चिदभ्यसत्। कीर्त्तनभक्तेः सूचना अपि प्राप्यते तत्र विष्णोर्नु कं वीर्याणि प्रवोचम् अर्थात् श्रीविष्णोः लीलापराक्रमादितत्त्वं वर्णयामि इति परमात्मनः लीला-गुणानुकीर्तनस्य सूचना मंत्रे अस्मिन् प्राप्यते। एवं अत्र भक्तिमार्गस्य कथा लक्षते।

यथा वैदिकसाहित्येषु नवधाभक्तेः सूचना प्राप्यते तथैव सर्वोपनिषदा सारस्वतरुपायां श्रीमद्भगवद्गीतायामपि नवधाभक्तेः प्रमाणमुपलभ्यते। श्रवणभक्तिविषये भगवता कृष्णेन अर्जुनं प्रति उपदिश्यते। यथा-

"श्रद्धावानसूयश्च श्रृणुयादपि यो नरः।
सोपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मणाम्"।।
(श्रीमद्भगवतगीता, 18/71)

अस्मिन् श्लोके श्रद्धावान् अनसुयो गीताश्रबणात् एव मुक्तिं प्राप्नोति इति उक्तम्। कीर्त्तन-स्मरणभक्तिविषये तत्र सूचनां उपलभ्यते। यथा-

"अभ्यासेप्यसमर्थोसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवापस्यसि"।।
(श्रीमद्भगवतगीता, 12/10)

अत्र अभ्यासेयोगे असमर्थोपि भगवतकर्मपरायणो भूत्वा तस्य कथाश्रवण-कीर्तन-वंदनार्चन-तन्मन्दिरमार्जन-पुष्पचयन-ततपरिचर्यादि कर्तुं सूचना प्राप्यते। पुनश्च दास्यभक्तिविषये तत्र प्रमाणं प्राप्यते।

"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः"।।
(श्रीमद्भगवतगीता, 9/34)

अत्र मद्भक्ताशब्देन भगवान् एव एकमात्रपरमगतिः भर्त्ता-स्वामी इति मत्वा तन्नाम-रुप-गुण-प्रभाव-लीलादी श्रवण-कीर्तन-स्मरणेषु तस्मै सर्वसमर्पणभाव एव दास्यभक्तेः सूचना लभ्यते। ततः सख्यभक्तिविषये प्रमाणं प्राप्यते यथा-

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः"।।
(श्रीमद्भगवतगीता, 18/66)

अत्र मामेकं शरणं व्रज इति वाक्येन चिन्ता-सेवा-पूजा-प्रणति पूर्वकं सर्वधर्मपरित्यागेन केवलं भगवतः शरणागतिः एव आत्मनिवेदनात्मिका भक्तिरिति कथ्यते। एवं अत्र अस्मिन् ग्रन्थे भक्तिमार्गः इत्यस्य कथा सरलतया आलोच्यते। अयं भक्तिमार्गेण को अपि जनाः ईश्वरं प्राप्तुं शक्यन्ते तथा मोक्षं लभ्यन्ते इति।

वैदिकसाहित्यात् श्रीमद्गीतायां च परं पुराणसाहित्ये भक्तितत्त्वस्य पुंखानुपुंखं वर्णनं दृश्यते। उक्तितत्त्वस्य विवेचनं प्रायतः अष्टादशपुराणेषु उपलभ्यते। यद्यपि सर्वेषु पुराणेषु भक्तेः स्वरुपाणां यत्र तत्र वर्णनं दृश्यते तथापि ब्रह्म-पदम-विष्णु-भागवतादि भक्तिप्रधानपुराणेषु भक्तितत्त्वस्य सर्वाधिकं

वर्णनमुपलभ्यते साधिता। ब्रह्मपुराणे श्रीकृष्णभक्तितत्त्वस्य विस्तारेण सह वर्णनादनन्तरं तत्सम्वन्धि ज्ञानमिश्रितभक्तितत्त्वं वर्णितम्। यथा-

"अप्यन्यचित्तोशुद्धो वा यः सदा कीर्त्तयेद्धरिम्।
सोपि दोषक्षयान् मुक्तिं लभेच्चेदिपतिर्यथा"।।

अत्र भगवतः नामकीर्तनेन द्वेष्यभक्तापि मुक्तिः प्राप्ता इति कथितम्। एवं अत्र भक्तिमार्गस्य कथा विद्यते।

## निष्कर्ष

'भक्तिमार्गः' इति विषये डिण्डिमजीवदेवाचार्यस्य अवदानं अतीव ग्राह्यम् अतुलनीयं च अस्ति। यथा तेन स्वस्य लिखितपुस्तके भक्तिमार्गविषये चर्चा कृता, तत् पाठकाः सामान्यजनाः च सहजतया लाभं प्राप्नुवन्ति। भक्तिमार्गविषये पुराने, श्रीमद्भागवतग्रन्थे यत् उक्तं तस्मात् किञ्चित् भिन्नरुपेण डिण्डिमजीवदेवाचार्येण भक्तिमार्गं अस्माकं समक्षं प्रस्तुतवान् अस्ति। सः जनानां जीवनपद्धतिं, तेषां कर्माणि, तेषां विचारान् सर्वं अवगच्छति स्म। किमर्थं जनाः ईश्वरस्य आराधनात् विमुखाः भवन्ति, किमर्थं जनाः लौकिकवस्तूनाम् अधिकं आकृष्टाः भवन्ति, किमर्थं जनानां जीवने धर्मस्य स्थानं नास्ति- इत्यादयः विषयेषु सः सम्यकरुपेण आलोचितवान्। तेन अतीव सुन्दरं चर्चां कृता, यत् अयं जगत् मायया बद्धः अस्ति, अस्मिन् जगति जनानां केवलं दुःखं भवितुमर्हति, सुखम् इति किमपि नास्ति। मानवजीवनस्य मूलं लक्षं चतुरवर्गस्य प्राप्तिः, ईस्वरस्य प्राप्तिः, इन्द्रियाणां नियन्त्रणं, लौकिकवस्तू प्रति मनः संयमं च भवति। मोक्षप्राप्तिः, सम्यक् ज्ञानं प्राप्तिः, मनसि आध्यात्मिकविचारप्राप्तिः इत्यादयः। एतस्य सर्वस्य एकमात्रं मार्गं भक्तिमार्गः एव। डिणिडमजीवदेवाचार्येण अतीव सरलतया इमं भक्तिमार्गं अस्माकं समक्षं प्रस्तुतः अस्ति। एवं सः विष्णुभक्तेः कथा उक्तवान्।

अनया विष्णुभक्त्या जनानां जीवनं कथं सुलभं सरलं च भविष्यन्ति, तत् सः ग्रन्थेषु उक्तवान्। यथा-

1. जनानां जीवने बहवः विघ्नाः सन्ति, तेभ्यः मुक्तिं प्राप्तुं एकमात्रं उपायं भक्तिमार्गः एव।
2. मानवजीवनस्य मुख्यं लक्षं ईश्वरप्राप्तिः, ईश्वरप्राप्तेः सुलभः मार्गः भक्तिमार्गः अस्ति।
3. भक्तिमार्गेण जनाः सहजतया अज्ञानात् ज्ञानमार्गं प्रति आगन्तुं शक्नुवन्ति।
4. भक्तिमार्गेण हि मानवचरितचगुणानां विकाशं अतीव सुलभतया सम्भवन्ति।
5. भक्तिमार्गेण हि सहजतया को अपि जनः अस्मात् लौकिकजगतात् आध्यात्मिकलोकं प्रति स्वजीवनं गन्तुं शक्यते।
6. मानवजीवनस्य मोक्षलाभस्य सुलभः मार्गः भक्तिमार्गः हि। अनेन भक्तिमार्गेण जनाः मोक्षं प्राप्नुवन्ति। मानवजीवने इन्दियाणां नियन्त्रणं कठिनम्, इन्दियाणां नियन्त्रणार्थं भक्तिमार्गस्य सर्वथा आवश्यकः अस्ति।

## सन्दर्भग्रन्थसूची


1. Bhaktivaibhavanatakam, Behera, Dr.K.S & Dhal, Dr. U.N. Orissa: Sahitya Akademy, 1998**.**
2. Sanskrit Sahitter Itihas, Das, Dr.Debkumar, Kolkata: Sri Balaram Prakasini, 1418.
3. A Higher Sanskrit grammar & composition, Dr. Lahiri & Sastri, Kolkata, The, Dhaka Students Library, 1956.
4. Sanskritsahitte itihas, Acharya Hansaraj Agarwal, 2009, Chowkhamba surbharoti prakashan, gopal mandir lane, Baranosi-221001.
5. Chondomanjori, Dr. Anil Chandra Basu, 2003, Sanskrit Book Dipo, Bidhan Sarani, Kolkata 700006.
6. The Study of Sanskrit, Dr. Anil Chandra Basu, 2004, Sanskrit Book Dipo, Bidhan Sarani, Kolkata 700006.
7. Kabyadarsha, Dr. Anil Chandra Basu, 2002, Sanskrit Book Dipo, Bidhan Sarani, Kolkata 700006.
8. Kabyalankarsutrabritti, Dr. Anil Chandra Basu, 2003, Sanskrit Book Dipo, Bidhan Sarani, Kolkata 700006.
9. Dasharupakam, Dr. Anil Chandra Basu, 2012, Sanskrit Book Dipo, Bidhan Sarani, Kolkata 700006.
10. Sanskrit Saptakam, sriproduyatkumar bandopadhaya, 2010, Dhaka student library, Shyamacharan De Street, Kolkata 7000073.